(iv) सन्ति पुस्तकविन्यस्ताः काव्यबन्धा गृहे गृहे।
द्वित्रास्तु भावकमनःशिलापट्टनिकुट्टिताः ॥

(v) आवापोद्धरणे तावद् यावद् दोलायते मनः।
पदानां स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती ॥

11. क्षेमेन्द्रस्य परिचयपूर्वकं तस्य औचित्यविचारचर्चायाः वैशिष्ट्यं वर्ण्यताम्।

अथवा

केषाञ्चित् त्रयाणां लक्षणं सोदाहरणं विलिख्यताम्—

(i) पदौचित्यम्
(ii) रसौचित्यम्
(iii) कारकौचित्यम्
(iv) देशौचित्यम्
(v) अवस्थौचित्यम्

12. कयोश्चिद् द्वयोः विवेचना विधेया—

(i) अलङ्कारसम्प्रदायः
(ii) ध्वनिसम्प्रदायः
(iii) वक्रोक्तिसम्प्रदायः



Dummy Question Paper for Testing

Roll No. ..........................

# C–864

## M. A. (Fourth Semester) (Main/ATKT) EXAMINATION, May-June, 2019

SANSKRIT

Paper Eighth

(साहित्यसिद्धान्तः)

*Time : Three Hours* ] [ *Maximum Marks : 80*

सूचना : सर्वे प्रश्नाः समाधेयाः।

खण्ड—अ प्रत्येक 3

(अतिलघूत्तरीयाः प्रश्नाः)

1. काव्यमीमांसा कति अधिकरणेषु विरचिता ?
2. काव्यमीमांसामते सामान्यतया कति विद्याः तासां नामानि विलिख्यताम्।
3. क्षेमेन्द्रमतेन औचित्यस्य लक्षणं लेखनीयम्।
4. वक्रोक्तिसम्प्रदायस्य कः प्रवर्तकः ? तेन प्रवर्तकेन को ग्रन्थो लिखितः ?

## खण्ड—ब

प्रत्येक 5

(लघूत्तरीयाः प्रश्नाः)

5. ससन्दर्भं व्याख्यायताम्—

सरितामिव प्रवाहास्तुच्छाः प्रथमं यथोत्तरं विपुलाः।
ये शास्त्रसमारम्भा भवन्ति लोकस्य ते वन्द्याः॥

**अथवा**

कतिविधः शिष्यः राजशेखरमतेन ? सलक्षणं वर्ण्यताम्।

6. अधस्तनस्य ससन्दर्भं व्याख्या विधेया—

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।
यस्त्वशक्तिकृतस्य झटित्येवावभासते॥

**अथवा**

राजशेखरमतेन कविभेदान् विलिख्य शास्त्रकविभेदान् वर्णयन्तु।

7. अधोलिखितां कारिकां व्याख्यायताम्—

औचित्यरचितं वाक्यं सततं संमतं सताम्।
त्यागोदग्रमिवैश्वर्यं शीलोज्ज्वलमिव श्रुतम्॥

**अथवा**

स्वभावौचित्यस्य लक्षणं विलिख्यताम्।

8. वामनाचार्यस्य वैशिष्ट्यं वर्णयन्तु।

**अथवा**

'वाक्यं रसात्मकं काव्यम्' इत्युक्तिः समीक्ष्यताम्।





## खण्ड—स

प्रत्येक 12

(दीर्घोत्तरीयाः प्रश्नाः)

9. काव्यपुरुषस्य उत्पत्तिः कथमभवत् तस्य किं च स्वरूपमिति सम्यग् विवेचयन्तु।

**अथवा**

अधोलिखितेषु कानिचित् **चत्वारि** स्पष्टीकरणीया—

(i) त्रयी
(ii) पुराकल्पः
(iii) दुर्बुद्धिः
(iv) अभ्यासः
(v) महाकविः
(vi) कविराजः
(vii) संक्रामयिता

10. काव्यपाकस्य अर्थं विलिख्य तस्य भेदान् वर्णयन्तु।

**अथवा**

अधोलिखितेषु केषाञ्चित् **त्रयाणां** व्याख्या विधेया—

(i) द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिष्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति॥

(ii) काव्यकाव्याङ्गविद्यासु कृताभ्यासस्य धीमतः।
मन्त्रानुष्ठाननिष्ठस्य नेदिष्ठा कविराजता॥

(iii) प्रतिभातारतम्येन प्रतिष्ठा भुवि भूरिधा।
भावकस्तु कविः प्रायो न भजत्यधमां दशाम्॥